# । द्वितीयोऽध्याय: ।

## सारस्वतं व्याकरणम् ।

### (अ) सारस्वत व्याकरणपरम्परा

सारस्वतव्याकरणपरम्परायाः समयविषये न किञ्चिदपि विशेषं ज्ञायते । ख्रिस्ताब्दस्य १२५० तमे वर्षे सञ्जातः मुग्धबोधव्याकरणस्य रचयिता बोपदेवः अस्याःव्याकरणपरम्परायाः निर्देशं न कृतवान् । बोपदेवः अन्यासां व्याकरणपरम्पराणामुल्लेखं कृतवान् किन्तु तत्र तस्य ग्रन्थे सारस्वतव्याकरणपरम्परायाः उल्लेखाभावेनेदं ज्ञायते यत्तस्मिन्काले अर्थात् ख्रिस्ताब्दस्य १२५० तमे वर्षे अस्याः व्याकरणपरम्परायाः आविर्भावोऽथवा विशेषो विस्तारः नाऽऽसीत् । एवञ्च श्रीहेमचन्द्राचार्याः अपि सारस्वतव्याकरणपरम्पराविषये परिचिताः न दृश्यन्ते । एवञ्च सारस्वतव्याकरणपरम्परायाः एकाऽपि टीका ख्रिस्ताब्दस्य १४५० तमवर्षात् पूर्वकालीना न प्राप्यते । प्रायः सर्वाः टीकाः षोडशे वा सप्तदशशतके विरचिताः सन्ति ।

अन्य टीकाकाराणां जन्मस्थानविषये, हस्तप्रतपुनर्लेखनेन, प्राप्तिस्थानविषयाभ्यासेन चेदं निश्चीयते यदस्याः व्याकरणपरम्परायाः सुवर्णकालः नागपुर, उदयपुर, बिकानेर, दिल्ली, बङ्गदेश पर्यन्तमेव सीमितो दृश्यते । यदा श्रीभट्टोजिदीक्षितमहोदयैः, तेषां च शिष्यैः पाणिनीयव्याकरणपरम्परायाः आधुनिकं पुनरुत्थानं सञ्जातं तदनन्तरं सारस्वतव्याकरणपरम्परायाःप्रभावः आसीत् । तत्कालनन्तरं सर्वासां व्याकरणपरम्पराणां पतने समारब्धे इयं सारस्वतव्याकरणपरम्परा बङ्गदेशीय प्रान्तेष्वेव निजास्तित्वमरक्षत् ।

भगवतः पाणिनेः अष्टाध्याय्याः ४००० सूत्राणि। तत्तुलनायां सारस्वतव्याकरणस्य केवलं ७०० सूत्राणि सन्ति । अत एव ज्ञायते यत् सारस्वतव्याकरणमतीव सरलशैल्या रचितम् । कातन्त्रव्याकरणवत् सारस्वतव्याकरणस्योद्भवः व्याकरणसरलीकरणस्याऽऽवश्यकताबोधकः एव ।

इदमपि सम्भाव्यते यत् भारतदेशे मुस्लीमशासकानां मनसि संस्कृताभ्यासस्य विचारः समजनि । तेन कारणेन ग्यासुद्दिन खीलजि, हुमायुः एवं सालेमशाहादीनां मुस्लीमशासकानां संस्कृतव्याकरणस्य प्रसारप्रचारविषये विशिष्टं प्रदानं वर्तते ।

ख्रिस्ताब्दस्य १६७९ तमे वर्षे उदयपुरराज्यस्य राज्ञा उदयसिंहेनापि अस्य व्याकरणस्य सारल्यं दृष्ट्वा तस्याभ्यासः राज्यव्यवस्थायामनवरोधकत्वमित्यनुभूय तादृशः प्रचारप्रसारश्च कृतः येन धनिककुटुम्बेषु संस्कृतस्य लोकप्रियता प्रतिष्ठापिता ।

## अन्य व्याकरणस्य विशिष्टता -

**(१) सूत्रसंक्षिप्तीकरणम् -** सूत्रसंक्षेपः एव अस्य महत्वपूर्णं वैशिष्ट्यं वर्तते। तथाहि जैनेन्द्रेण, बोपदेवेन च भगवतः पाणिनेः सूत्राणां संक्षेपार्थं प्रयासौ कृतौ। जैनेन्द्रस्य ३००० सूत्रेषु बोपदेवस्य च १२०० सूत्रेषु विषयग्रन्थनं सारल्यं न भजते। एवञ्च संक्षिप्त व्याकरणपरम्परायाः अपरं कान्त्रव्याकरणमपि १४०० सूत्राणि स्वीकरोति। अनेनैव कारणेन सारस्वतव्याकरणे ७०० सूत्राणां समावेशेन समग्रव्याकरणविषयाः परिगृहीताः इति विशेषेण महत्वं भजते।

**(२) सरलीकरणम् -** अध्ययनाध्यापनार्थं संक्षिप्तकरणापेक्षया सारल्यं अतीव महत्वं भजते, इति सर्वजनसाधारणमतिना सारस्वतव्याकरणं तस्य पुरोगामिव्याकरणापेक्षया अधिकं सरलं वर्तते। प्रत्याहारग्रहणविषयेऽपि इदं व्याकरणं च ट त क प वर्णानां 'चप' इति प्रत्याहारं गृहीत्वा सरलरुपेण प्रत्याहारान् योजयति। पाणिनीय व्याकरणे याः संज्ञाः सन्ति तासामपेक्षया सारस्वतव्याकरणे सवर्ण-सन्ध्यक्षराणि इत्याद्याः सरलतमाः अन्वर्थकाश्च संज्ञाः प्रयुक्ताः दृश्यन्ते। अथ च आख्यात - तद्धित - स्वर-व्यञ्जन -उपधा-कृदन्तेत्यादयः सुदृढाः संज्ञाः अपि स्वीकृताः। अनया रीत्या सारस्वतव्याकरणं लोकप्रसिध्धसंज्ञाप्रदानेन, सरलतायाः माध्यमेन च कालव्ययं न कुरुते। सारस्वतव्याकरणस्य सूत्राणां प्रतिपत्तौ सरलतायाः सत्वात् अर्थावबोधने परिभाषाणां साहाय्यं नाऽपेक्षते। सारस्वतव्याकरणे दुरूहाणामनावश्यकानां च रूपाणां सर्वथा त्यागः एव कृतः। अत अस्य व्याकरणस्य सरलता सर्वोपरी भवति। वैदिक व्याकरणस्य अनियमितरूपाणां स्वराणां च अग्रहणेनेदं साध्यते यत् व्याकरणस्य मूलोद्देशः भाषायाः साहित्यस्य च अभ्यासार्थमेव भवेत्। एवञ्च अन्यव्याकरणवत् उणादिसूत्राणामपि सरल रीत्या प्रस्तुतीकरणं दृश्यते। अथ पतिः समास एव सखि शब्द वत् वक्तव्यः अथवा 'गवादेरवर्णागमोऽक्षादौ वक्तव्यः', 'अथवा 'जरायाः स्वरादौ जरस् वा वक्तव्यः' इत्येतानि वार्तिकरूपेण परवर्तिकाले संगृहीतानि, सरलीकृतानि, यतः अतिप्रसिद्धरूपाणामपि स्वीकरणं भवेत्।

**सारस्वतव्याकरणस्य परम्परायाः संस्थापकः -** परवर्तिकालप्राप्तवार्तिकानां रचयिता यतिवर्यः अनुभूतिस्वरुपाचार्यः श्रूयते। किन्तु स्वयं सरस्वतीसकाशात सूत्रप्राप्तकर्तृरूपेण वर्तते इति विषये संदिग्धता एव। सारस्वतव्याकरणे अनुभूतिस्वरुपाचार्यः कानिचित् वार्तिकानि स्थापयति येन कारणेन सूत्रकाररूपेण अनुभूतिरूपाचार्यः एव सिद्धो भवति। अथ च सारस्वत प्रक्रियायां अनुभूतिस्वरूपाचार्येण प्रदत्ताः नियमाः अन्यासु टीकासु नोपलभ्यन्ते। अत एव ज्ञायते यत्-अयमेव सारस्वतव्याकरणस्य सूत्रकारः। किन्तु क्षेमेन्द्रः सारस्वतव्याकरणोपरि स्वटीकायां उपसंहारे लिखति यत्- "इति श्री नरेन्द्राचार्यसारस्वते क्षेमेन्द्रकृतं टीप्पनं समाप्तम्" इत्युल्लेखे सारस्वतसूत्रकाररूपेण श्रीनरेन्द्राचार्यस्य नामोल्लेखः वर्तते। अपरः टीकाकारः अमृतभारती लिखति यत् -

''यन्नरेन्द्रनगरिप्रभाषितं यच्चवैमलसरस्वतीरितम् ।

तन्मयाऽत्रलिखितं तथाधिकं किञ्चिदेव कलितं स्वया धिया ।। इति ।

प्रक्रियाकौमुदीप्रसादे श्रीविठ्ठलाचार्येण नरेन्द्राचार्यस्य सूत्रकाररूपेण नामोल्लेख: कृत: । अनया रीत्या परस्परविरोधोल्लेखै: नरेन्द्राचार्येण सरस्वत्या: आराधनां कृत्वा, आहोस्वित् अनुभूति स्वरूपाचार्येण कृत्वा सरस्वतीसकाशात् व्याकरणं प्राप्तमिति भविष्यत्कालीनाध्ययनस्य विषयक्षेत्रम् ।

**अनुभूतिस्वरुपाचार्यस्य सारस्वतप्रक्रिया :-**

सारस्वतसूत्रकारविषये श्रीनरेन्द्राचार्यस्य विषये वा न अन्यन्मतं विद्यते । मुस्लीमसाम्राज्यस्य भारतवर्षे दृढरुपेण स्थापितकाल: एव अनुभूतिस्वरूपाचार्यस्य काल: मन्यते । तस्मिन् काले तेन प्रक्रियालेखने विचार: कृतो भवेत् । तदा सारस्वतसूत्राणां क्रम: अव्यस्थित: आसीत् । अत एव तेषां सूत्राणां तार्किकेन स्पष्टीकरणेन सम्यक्रुपेण ग्रथनं कृतम् । अत: स: सारस्वतप्रक्रियाया: आरम्भे एव लिखति - ''सारस्वतीमृजुं कुर्वे'' इति । अनुभूतिंस्वरूपाचार्यस्य काल: ख्रिस्ताब्दस्य १४५० पर्यन्तं निश्चेतुं शक्यः । तथाच ख्रिस्ताब्दस्य १४५० तमे वर्षे सारस्वतप्रक्रियाया: प्रथम: टीकाकार: पुञ्जराज: अभवत् । अनुभूतिस्वरूपाचार्येण सारस्वतसूत्राणि सुव्यवस्थितरीत्या ग्रथितानि । तदनन्तरं तस्य प्रक्रियानुसारं टीकापरम्परा समारब्धा । अनया रीत्या पञ्चसप्तत्युत्तरशतं (१७५) वर्षाणां मध्ये पञ्चदश (१५) टीका: प्राप्यन्ते । तासां सर्वासां प्रयोजनमेकमेव महदंशेन सरलीकरणं इति । अत: सर्वे टीकाकारा: अनुभूतिस्वरूपाचार्यमन्वसरन्निति ज्ञायते ।

**सारस्वतप्रक्रियाया: टीकाकारा: -**

**(१) पुञ्जराज: -** पञ्चदशशतके विद्यमान: अयं मलबारप्रदेशस्य श्रीमाल वंशोत्पन्न: मालवदेशवास्तव्य: ग्यासुद्दीन खीलजी नाम्नो नृपस्य अमात्य: आसीत् । विद्वद्भि: सत्कृत: , व्यवहारकुशल: धार्मिकक्रियारतश्चासीत् । तेन पुञ्जराजेन अलङ्कारशास्त्रोपरि शिशुप्रबोध: एवं ध्वनिप्रदीपो नाम ग्रन्थद्वयरचना कृता ।

**(२) अमृतभारती -** पञ्चदशशतके विद्यमान: अमलसरस्वत्या: शिष्य: 'परमहंसपरिव्राजकाचार्य' इत्युपाधिना विभूषित: अयं टीकाकार: आसीत् । तेन सुबोधिका नाम टीका विरचिता । अस्या: टीकाया: प्राचीनहस्तप्रतं ख्रिस्ताब्दस्य १४९७ तम वर्षाङ्कितं प्राप्यते ।

**(३) क्षेमेन्द्र :-** षोडशशतके विद्यमान: अयं टीकाकार: कृष्णाश्रमस्य शिष्य: हरिभट्टापरनाम हरिभद्रस्य पुत्र: आसीत् । काश्मीरवासि अयं क्षेमेन्द्र: अन्यो वर्तते ।

**(४) माधव :** - षोडशशतके विद्यमानेन भानोः पुत्रेण श्रीरङ्गनाथशिष्येण च माधवेन स्वटीकायां पूर्ववर्तिनां टीकाकाराणां निर्देशः कृतो वर्तते। तस्य माधवस्य टीकायाः समयः विक्रमसंवत् १५९१ तमं वर्षं वर्तते।

**(५) चन्द्रकीर्ति :** - षोडशशतके विद्यमानस्य अस्य टीकाकारस्य सुबोधिका अथवा दीपिकेति नामद्वयेन प्रसिद्धा टीका विद्वज्जनतोषिणी वर्तते। अयं टीकाकारः नागपुरप्रदेशस्य बृहद्गच्छीयो जैनः आसीत्। अयं कौटिके जैनक्षेत्रे निवसति स्म। चन्द्रकीर्तिमुनेः शिष्येण हर्षकीर्तिनाम्ना व्याकरणस्य धातुपाठः एवं च टीकाऽपि लिखिता। दिल्लीप्रदेशस्य शाहीसलेम नाम्ना नृपेण चन्द्रकीर्तिमुनिःसन्मानितः इत्यधोलिखितेन पद्येन ज्ञायते -

''श्रीमत्साहीसलेमभूमिपतिना सन्मानितः सादरम्
सूरिः सर्वकलिन्दिकाकलित धीः श्रीचन्द्रकीर्तिः प्रभुः ''। इति

**(६) वासुदेवभट्टः** - षोडशशतके विद्यमानः अयं स्वकथनानुसारेण चण्डीश्वरस्य शिष्यः आसीत्। तस्य टीका सारस्वत प्रसादः इति नाम्ना प्रसिद्धा। अन्ते सः लिखति यत् -

''संवत्सरे वेद - वह्नि- रस - भूमिसमन्विते ,।
शुचौ कृष्ण द्वितीयायां प्रसादोऽयं निरूपितः ॥ इति।

**(७) मण्डनः**- षोडशशतके विद्यमानः मण्डनः सन्धिप्रकरण पुष्पिकाऽनुसारेण अल्पशाहिनः महाअमात्यः एवं सङ्घपतिरासीत्। अस्य पितुर्नाम वाहडः इति। सः खरतरगच्छजैनः आसीत्।

**(८) मेधरत्नः**- षोडशशतके विद्यमानः अयं टीकाकारः बृहत्खरतरगच्छस्य विनयसुन्दरमुनेः शिष्यः आसीत्। तस्य टीका 'सारस्वतव्याकरणढुण्ढिका' अथवा सारस्वतप्रदीपिका' इति वर्तते। अस्याः टीकायाः एकस्मिन् हस्तप्रते वि.सं. १६४१ अर्थात् ख्रिस्ताब्दः १५९६ इति समयः उद्बोधितः।

**(९) काशीनाथः** - षोडशशतके वर्तमानस्य अस्य टीकाकर्तुः टीकायाः नाम सारस्वतभाष्यमिति। तस्य समयः बुरहानपुरनगरे हस्तप्रतात् प्रतिलिपिकृतात् ख्रिस्ताब्दः १६१० इत्यनुमीयते।

**(१०) धनेश्वर :** - सप्तदशशतकीनोऽयं क्षेमेन्द्र टीप्पनाख्या टीका क्षेमेन्द्रटीकाशोधनार्थं रचितवान्। अस्य समयः ख्रिस्ताब्दः १६२५ समयपश्चात् अनुमीयते। अस्याः टीकायाः प्राचीनतमं हस्तप्रतं ख्रिस्ताब्दस्य १५७५ तमे वर्षे प्राप्यते। अनेन टीकाकारेण महाभाष्योपरि चिन्तामणिः नाम्नी टीका रचिता.

इति तद्धितप्रकरणस्यान्ते प्राप्तेषु पञ्चश्लोकेषु निर्दिष्टम् ।

**(११) जगन्नाथः** - सप्तदशशतके विद्यमानः अयं जगन्नाथः धनेश्वरस्य अनुगामी एव, यतः अनेन सारस्वताख्यायां टीकायां धनेश्वरस्योल्लेखः कृतः ।

**(१२) भट्टगोपाल :** - सप्तदशशतकीनस्य अस्य भट्टगोपालस्य समयः ख्रिस्ताब्दस्य १६१५ तमे वर्षे एवानुमीयते । इति प्रतिलिपिकृतात् हस्तप्रतात् मन्यते ।

**(१३) सहजकीर्तिः** - अयं टीकाकारः सप्तदशशतके विद्यमानः जैनवाचनाचार्यः आसीत् । खरतरगच्छस्य हेमनन्दनगणिवर्यस्य शिष्यः आसीत् । तेन सारस्वतप्रक्रियावार्तिकाभिधायां नाम्नि टीकायां लिखितं यत्-

वत्सरे भूमिसिद्ध्यङ्केकाश्यपी प्रमितिश्रिते,

माधस्य शुक्लपञ्चम्यां दिवसे पूर्णतामगात् '' इति ।

अतोऽस्य टीका वि.सं. १६८१ तमे वर्षे अर्थात् ख्रिस्ताब्दस्य १६२३ तमे वर्षे विरचिता भवेत् ।

**(१४) हंसविजयगणिः** - सप्तदशशतके विद्यमानेनानेन शब्दार्थचन्द्रिकाख्या टीका विरचिता । इयं टीका केवलं लध्वीस्वरूपेण वर्तते । यतोऽस्यां टीकायां मङ्गलश्लोकानामेव व्याख्यानं वर्तते । विजयनानन्दस्य शिष्यः हंसविजयगणिः विक्रमसंवत् १७०८ तमे वर्षे अर्थात् ख्रिस्ताब्दस्य १६५१ तमे वर्षे समजनि ।

**(१५) रामभट्टः**- अयं विद्वत्प्रबोधिनी अर्थात् रामभट्टि नाम्नीं टीकां रचितवान् । अस्याः टीकायाः विषयो तावती जिज्ञासा नोत्पादयति यावती तस्याः कुतूहलजननी रचना । प्रत्येक प्रकरणस्यान्ते प्रायः १तः ५ श्लोकेषु रामभट्टः स्वविषयस्य, कुटुम्बविषयस्य, यात्राविषयस्य च वर्णनैः ज्ञापयति यदयं तैलङ्गणस्य आन्ध्रदेश वास्तव्यः । तस्य पितुर्नाम नरसिंहः, एवं मातुर्नाम कामा । सा अतिधार्मिकाऽऽसीत् । अनेन यात्राकाले यत्र यत्र स्थले समयः प्राप्तः तत्र तत्र समयस्य सदुपयोगार्थं विद्वद्प्रबोधिनी नाम्नी टीका विरचिता ।

## सारस्वतप्रक्रियाया: पृथक् टीका :

एतासु टीकासु रामचन्द्राश्रमस्य सिध्धान्तचन्द्रिका अतीव प्रसिद्धा वर्तते । यमवलम्ब्य अन्या: टीका: विरचिता: ।

**(१) लोकेशकर:-** क्षेमङ्करस्य पुत्र: रामकरस्य च पौत्र: अयम् । अनेन सिध्धान्तचन्द्रिकामधिकृत्य १७४१ तमे वैक्रमे संवत्सरे चन्द्र - वेद - हय - भूमि संयुते खिस्ताब्दस्य १६८३ तमे वर्षे तत्वदीपिका नाम्नी टीका लिखिता ।

**(२) सदानन्द:-** अस्य सुबोधिनी नाम्नी टीका वारणसीत: प्रकाशिता ।

**(३) तर्कतिलकभट्टाचार्य:** - द्वारिकादासस्य पुत्र: मोहनमधुसूदनस्य लधुबन्धु: तर्कतिलकभट्टाचार्य: सारस्वतसूत्रोपरि स्वतन्त्रां टीकां लिखितवान् ।

**(४) जिनेन्दु:** - जिनरत्न: इत्यपरनाम्ना अनेन ' सिद्धान्तरत्निका' नाम्नी टीका रचिता । तस्या: सिद्धान्तरत्नंमित्यपरं नाम प्राप्यते ।

एवञ्च भट्टोजिदीक्षितस्य शिष्येण रधुनाथेन पतञ्जले: शैलिमनुसृत्य लधुभाष्यम् नाम सारस्वतसूत्रोपरि ग्रन्थो लिखित: । तस्य समय: खिस्ताब्द: १६५० मन्यते ।

## सारस्वत व्याकरणस्य सहायकग्रन्था:

सारस्वतव्याकरण सहायका: ग्रन्था: नाधिकरूपेण प्राप्यन्ते । तथा च उणादि सूत्रोपरि परिभाषोपरि च ग्रन्था: न प्राप्यन्ते । चन्द्रकीर्तिमुने: शिष्येण हर्षकीर्तिणा सारस्वतधातुपाठोपरि ' तरङ्गिणी नाम्नी टीका लिखिता । तस्य समय: खिस्ताब्द: १५६० वर्तते । माधवनाम्न: टीकाकारस्य सारस्वतव्याकरणानुसारेण शब्दानां व्युत्पत्तिकरणार्थं कृतो प्रयास: प्राप्यते । तस्य काल: प्राय: खिस्ताब्द: १६२० वर्तते कल्याणसरस्वती नाम्ना टीकाकारेणापि बालानां शीघ्रबोधाय, सुखबोधाय च 'लधुसारस्वतम्' नाम ग्रन्थस्य रचना कृता । तस्य समय: अष्टादशशतकस्य अन्तिमो भाग: मन्यते ।

## सारस्वत व्याकरणपरम्परा

अस्या: परस्परायाः विषये यदि विचारः क्रियेत तदेदं ज्ञायते यत् कातन्त्रव्याकरणपरम्परावत् इदं व्याकरणमपि तत्तत्समयानुसारं सुबोधनार्थं व्याकरणसारल्यार्थं व्यरचि । तदनन्तरं तस्याभ्यासः उत्तरभारते प्रत्येकसमये टीकारचना द्वारा प्रसारितो बभूव । तत्तत्स्थानानुसारेणापि टीका: रचिता: । तदनन्तरं सारस्वतव्यारकणे शुध्धिरूपेण प्राय: लेखनविषयेऽपि केनापि प्रयत्नो न विहित: । यत: सारस्वतव्याकरणस्याभ्यासु : छात्र: संस्कृतव्याकरणस्य संस्कृतभाषायाश्च बोधनमेवाऽवश्यकं मन्यते स्म । भट्टोजिदीक्षितस्य शिष्येण रधुनाथेन विरचितं लधुभाष्यं विहाय भट्टोजिदीक्षितस्य वैयाकरणसिध्धान्तकौमुदी, अथ च वरदराजस्य लधुसिध्धान्तकौमुदी इति ग्रन्थद्वयद्वारा सारस्वतव्याकरणं नामशेषं कृतम् । यस्योद्धार: जैनपरम्परायाः सततमध्यनमध्यापनं कृतवता साधुसाध्वीगणेन कृतः इति मम वैयक्तिकी भावना । अलं बहुना ।

एतेषूपरि निर्दिष्टेषु नरेन्द्राचार्यस्य सारस्वतसूत्रपाठः (१) टीकाकारेषु च श्रीमदनुभूतिस्वरूपचार्यस्य सारस्वतंव्याकरणं (२), विद्वद्वर रामाश्रमी विरचिता सिद्धान्त चन्द्रिका (३), जीनचन्द्रसूरेश्च सिद्धान्त रत्निका (४) प्रकाशमागताः सन्ति । अन्ये ग्रन्थाः प्रायोऽधुनाऽपि हस्तप्रतावस्थायामेव विविधजैनभण्डारेषु प्राच्यविद्यामन्दिरेषु च सुरंक्षिताः ।

अतोऽधुना तेषां चतुर्णा ग्रन्थानां परिचयोऽधस्तात् दीयते ।

**(१) नरेन्द्राचार्यस्य सूत्रपाठः** - सारस्वतमूलसूत्रपाठः इति नाम्ना पुण्यपत्तनस्य भाण्डारकर प्राच्यविद्यामन्दिरे हस्तप्रतमेकं वर्तते । तस्मिन् त्रयोदश प्रकरणानि, ५७० सूत्राणि, तदन्ते च ९१ वार्तिकानि च सन्ति ।

आरम्भे श्री सरस्वतीनमस्कारपूर्वकं ब्रह्म, शिवं, सरस्वतीं, लक्ष्मीं, हरिम् चेत्यादि सिद्धार्थदेवताः (५) नमस्कृत्य प्रकरणनिर्देशः (६) वर्तते ।

प्रथमे संज्ञाप्रकरणे अ इ उ ऋ लृ समानाः इत्यारभ्य आद्यन्ताभ्यामित्यन्तानि षट् सूत्राणि । द्वितीये स्वरसन्धिप्रकरणे इ यं स्वरे इत्यारभ्य ओष्ठोत्वोर्वाविति इत्यन्तानि एकोनविंशति सूत्राणि । तृतीये प्रकृतिभाव प्रकरणे नामी, य्वे द्वित्वे, औ निपातः प्लुतः, इति चत्वारि सूत्राणि । चतुर्थे व्यञ्जनसन्धि

प्रकरणे चपा अबे जबाः इत्यारभ्य ञमाः यपे स्य वा इत्यन्तानि सप्तदश सूत्राणि। पञ्चमे विसर्गसन्धि प्रकरणे विसर्जनीयस्य सः इत्यारभ्य सैषाद्धसे इत्यन्तानि दश सूत्राणि।

षष्ठे विभक्तिपाद प्रकरणे, अविभक्तिनामेत्यारभ्य नुधातोरित्यन्तानि द्व्यधिकशतं सूत्राणि। सप्तमे युष्मदस्मदी प्रकरणे युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाभिस्तेनेवांनौवस्नसादित्यारभ्य, एकत्वे द्विगुद्वंद्वावित्यन्तानि षट्सप्ततिः सूत्राणि। अष्टमे कारक प्रकरणे लिङ्गार्थेप्रथमेत्यारभ्य अन्योक्तेप्रथमेत्यन्तानि सप्त सूत्राणि। नवमे तद्धित प्रकरणे अपत्येऽण् इत्यारभ्य अरेदोनामिनोगुण इत्यन्तानि पञ्चत्रिंशत् सूत्राणि। दशमे स्त्रीप्रत्यय प्रकरणे आबतः स्त्रीयामित्यारभ्य उत औ इत्यन्तानि एकादश सूत्राणि।

एकादशे समास प्रकरणे समासश्चान्वये नाम्नामित्यारभ्य तदव्ययमित्यन्तानि विंशति सूत्राणि। द्वादशे आख्यात प्रकरणे धातोरित्यारभ्य नामिनश्चतुर्णां धो ढः इत्यन्तानि त्रिसप्तत्यधिकशतं सूत्राणि। अन्तिमे त्रयोदशे कृत्प्रकरणे कृत्कर्तरीत्यारभ्य लोकाच्छेषस्य सिद्धिरित्यन्तानि नवति सूत्राणि।

हस्तप्रतस्यान्तिमे पत्रे ९१ वार्तिकानन्तरं बुद्धेः प्रभावः एवं निर्दिष्टः-

बुद्धिः सर्वत्र सम्यञ्चा (?) बुद्धिः संसारसारिणी।
बुद्धेरगोचरं नास्ति तस्मात् बुद्धिर्गरीयसी ॥

अत्राऽस्मिन् सूत्रपाठे प्रक्रियाक्रमस्य स्पष्टं दर्शनं वर्तते, तथापि केषुचित् सूत्रेषु अनुवृत्तिः प्रभावं दर्शयति। यथा - द्वितीये प्रकरणे स्वरे इति पदं द्वादशसूत्रेषु अनुवृत्तिं लभते, अ इति स्वरो सप्तसूत्रेषु अनुवृत्तो दृश्यते। पञ्चमे प्रकरणे विसर्जनीयस्य इति पदं सम्पूर्ण प्रकरणस्य अनुवृत्तिलाभं भजते।

युष्मदस्मदी प्रकरणे प्रथमानि चतुर्दश सूत्राणि युष्मदस्मद् सर्वनाम्नोः साधना विषयकानि, किन्तु तदनन्तरं इवर्णोवर्णान्तानां शब्दानां, त्यदादीनाम् च शब्दानां साधनासूत्राणि, तदनन्तरं हसान्त (हलन्त) धातूनां साधनासूत्राणामन्ते समाससाधनासूत्राणि प्रदत्तानि।

कारकप्रकरणं त्वस्य दश सूत्रेष्वेव कार्यं पूर्णं करोति। आख्यातप्रकरणे दशलकाराणां क्रमः एवं वर्तते। -

| | |
|---|---|
| लट् | वर्तमाने ......... ॥ १२.२ ॥ |
| लिट् | परोक्षे............. ॥ १२.६ ॥ |
| लुट् | श्वस्तने........... ॥ १२.८ ॥ |
| लृट् | त्यादौ भविष्यति स्यप् ॥ १२.२० ॥ |
| लेट् | - |
| लोट् | आशीः प्रेरणयोः ....... ॥ १२.४ ॥ |
| लङ् | अनद्यतनेऽतीते......... ॥ १२.५ ॥ |
| लिङ् | विधिसम्भावनयोः .....॥ १२.३ ॥ |
| | आशिषि .................॥ १२.७ ॥ |
| लुङ् | दिवादावट्........ ॥ १२.२१ ॥ |
| लृङ् | स्यप् क्रियातिक्रमे ... ॥ १२.२३ ॥ |

अस्य व्याकरणस्य सूत्रेपाठेऽन्तिमं सूत्रे लोकाच्छेषस्यसिध्धिः (१३.९०) अतीव महत्वं भजते। अस्य व्याख्यानमेवमनुभूतिस्वरूपाचार्येण कृतं वर्तते। श्रीमतोऽनुभूतिस्वरूपाचार्यस्य सूत्रं - लोकाच्छेषस्यसिद्धिर्यथा मातरादेः (३, १०.१९) इत्येवं वर्तते। तेनेदं सूत्रमेवं व्याख्यातं ''अस्य सारस्वतव्याकरणस्य ये शेषाप्रयोगास्तेषां लोकात् अन्यव्याकरणात् सिद्धिर्भवति, यथा मातरादेः इत्यादि प्रयोगानुसारेण बोध्धव्यम्।

अत्रत्वेवमवश्यं हृदयेऽवधार्यं यत् लोकात् पदस्य प्रयोगः कलिकालसर्वज्ञेन श्रीमता हेमचन्द्राचार्येण स्वकीये सिध्धहैमशब्दानुशासने, लोकात् (७) (१,१.३) सूत्ररूपेण कृतो वर्तते। अतः पाणिनेः परवर्तीनां वैयाकरणानां व्याकरणग्रन्थाः संक्षिप्ततया, सरलतया, सुचारुरूपेण च संस्कृतभाषाया अध्ययने जिज्ञासून् साहाय्यं कर्तुं प्रायतन्त।

# पाणिनि- सारस्वतसूत्राणां तुलनम् ।

## (आ) प्रत्याहारा:

एकस्मान् ङ ञ ण व टा,
द्वाभ्यां षस्त्रिभ्य एव कणमा: स्यु: ।
ज्ञेयौ चयौ चतुर्भ्यो,
र: पञ्चभ्य: शलौ षड्भ्य: ॥

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| १ | ङ | - | एङ् | (६. १. ९४) | १६ | म | - | ङम् | (८, ३. ३२) |
| २ | ञ | - | यञ् | (७, १. १०१) | | | | | |
| ३ | ण | - | अण् | (१, १. ५१) | १७ | च | - | अच् | (१, १. ५७) |
| ४ | व | - | छव् | (८, ३. ७) | १८ | च | - | इच् | (६, २. ६८) |
| ५ | ट | - | अट् | (८, ४. ६७) | १९ | च | - | एच् | (६, १. ७८) |
| | | | | | २० | च | - | ऐच् | (१, १. १.) |
| ६ | ष | - | भष् | (८, २. ३७) | | | | | |
| ७ | ष | - | झष् | (८, २. ३७) | २१ | य | - | यय् | (८, ४. ५८) |
| | | | | | २२ | य | - | मय् | (८, ३. ३३) |
| ८ | क | - | अक् | (६, १.१०१) | २३ | य | - | झय् | (८, ४. ६२) |
| ९. | क | - | इक् | (१, १.३) | २४ | य | - | खय् | (८, ३. ०६) |
| १०. | क | - | उक् | (४, १.५) | | | | | |
| | | | | | २५ | र | - | यर् | (८, ४. ४५) |
| ११ | ण | - | अण् | (१, १. ६९) | २६ | र | - | झर् | (८, ४. ६५) |
| १२ | ण | - | इण् | (८, ३. ५७) | २७ | र | - | खर् | (८, ४. ५५) |
| १३ | ण | - | यण् | (६, १. ७७) | २८ | र | - | चर् | (८, ४. ५४) |
| | | | | | २९ | र | - | शर् | (८, ४. ६१) |
| १४ | म | - | अम् | (८, ३. ६) | | | | | |
| १५ | म | - | यम् | (८, ४. ६४) | | | | | |

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| ३० | श | - | अश् | (८, ३. १७) | ३८ | ल | - | वल् | (६, १. ७६) |
| ३१ | श | - | हश् | (६, १. ११४) | ३९ | ल | - | रल् | (१, १. २६) |
| ३२ | श | - | वश् | (७, २. ८) | ४० | ल | - | झल् | (८, २. २६) |
| ३३ | श | - | जश् | (८, ४. ५३) | ४१ | ल | - | शल् | (३, १.४५) |
| ३४ | श | - | झश् | (८, ४. ५३) | | | | | |
| ३५ | श | - | बश् | (८,२. ३७) | | | | | |
| ३६ | ल | - | अल् | (१, १. ६५) | | | | | |
| ३७ | ल | - | हल् | (१, १. ७) | | | | | |

## प्रत्याहाराः

भवलतमेकैकस्मात्, द्वाभ्यां मः, स्यात् पबौ चतुर्भ्यः स्तः
स षड्भ्यः स्यादित्थं, प्रत्याहारास्तु विंशतिर्ज्ञेयाः ।

| सारस्वत व्याकरणे – | | | | पाणिनेर्व्याकरणे – |
|---|---|---|---|---|
| १ | भ | - | झभ | झष् |
| २ | व | - | अव | ? |
| ३ | ल | - | इल | इण् |
| ४ | त | - | छत | खव् |
| ५ | म | - | यम | यम् |
| ६ | म | - | ञम | ञम् |
| ७ | प | - | यप | यय् |
| ८ | प | - | खप | खय् |
| ९ | प | - | चप | चय् |
| १० | प | - | झप | झय् |

| | | | | |
|---|---|---|---|---|
| ११ | ब | - | जब | जश् |
| १२ | ब | - | झब | झश् |
| १३ | ब | - | हब | हश् |
| १४ | ब | - | अब | अश् |
| १५ | स | - | खस | खर् |
| १६ | स | - | झस | झर् |
| १७ | स | - | हस | हल् |
| १८ | स | - | वस | वल् |
| १९ | स | - | रस | रल् |
| २० | स | - | शस | शल् |

## प्रत्याहाराः

| काशिका | भोजव्याकरणम् |
|---|---|
| एकस्मात् ङ ञ ण व टा, | भवलतमेकैकस्मात्, |
| द्वाभ्यां ष स्त्रिभ्य एव कणमाः स्युः। | द्वाभ्यां मः, स्यात् पबौ चतुर्भ्यः स्तः |
| ज्ञेयौ चयौ चतुर्भ्यो, | स षड्भ्यः स्यादित्थं, |
| रः पञ्चभ्यः शलौ षड्भ्यः ॥ | प्रत्याहारास्तु विंशतिर्ज्ञेयाः ॥ |

| | | | |
|---|---|---|---|
| १ | - | एङ् | - |
| २ | - | यञ् | - |
| ३ | - | अण् | - |
| ४ | - | छव् | - |
| ५ | - | अट् | - |
| ६ | - | भष् | - |
| ७ | - | झष् | झभ (१) |
| ८ | - | अक् | - |
| ९ | - | इक् | - |
| १० | - | उक् | - |

| | |
|---|---|
| ११ - अण् | - |
| १२ - इण् | इल (३) |
| १३ - यण् | - |
| १४ - अम् | - |
| १५ - यम् | यम (५) |
| १६ - ङम् | ञम प्रत्याहारादिः ञः (६) |
| १७ - अच् | - |
| १८ - इच् | - |
| १९ - एच् | - |
| २० - ऐच् | - |
| २१ - यय् | यप (७) |
| २२ - मय् | ? चप (९) |
| २३ - झय् | झप (१०) |
| २४ - खय् | खव (८) |
| २५ - यर् | - |
| २६ - झर् | झस् (१६) |
| २७ - खर् | खस (१५) |
| २८ - चर् | - |
| २९ - शर् | - |
| ३० - अश् | अब (१४) |
| ३१ - हश् | हब (१३) |
| ३२ - वश् | - |
| ३३ - जश् | जब (११) |
| ३४ - झश् | झब (१२) |
| ३५ - बश | - |
| ३६ - अल् | - |
| ३७ - हल् | हस (१७) |
| ३८ - वल् | वस (१८) |
| ३९ - रल् | रस (१९) |
| ४० - झल् | - |
| ४१ - शल् | शस (२०) |

## - (इ) धातुपाठविचार: -

भोजव्याकरणे द्वितीयावृतौ स्वीकृतानां २५३ धातूनां पाणिनियधातुपाठेन सारस्वतधातुपाठेन च सह संकलनरूपा तालिका अकारादि क्रमेण तुलनात्मक धातूसूची नाम्नि परिशिष्टे प्रदत्ता सा च तत्रैव द्दष्टव्या।

पाणिनीय धातुपाठे प्राय: २०७९ धातव: संगृहीता: । अनुभूतिस्वरूपाचार्यविरचिते सारस्वतव्याकरणे ३३९ धातव: संगृहीता: । तयोरपेक्षायां भोजव्याकरणकारेण महोपाध्याय - श्रीविनयसागरेण २५३ संख्याका: एव धातव: स्वीकृताः।

तेषु २५३ संख्याकेषु धातुषु २०६ संख्याका: पाणिनीयसारस्वतव्याकरणयो: समानार्थीया: । यद्यपि अत्यल्प: अगण्यश्च भेद: क्वचित् द्दश्यते, यथा भोजव्याकरणे अज (१९) गतौ क्षेपणे चे'ति सारस्वतव्याकरणेऽपि तथेव प्राप्यते, किन्तु पाणिनीय धातुपाठे अज (२३८) गतिक्षेपणयोरिति सम्मतोऽर्थ: । अत्रैताद्दश: समासविग्रहाख्यो वा विग्रहसमासाख्योऽर्थभेदो वा २०६ संख्याकेषु धातुषु पृथक् न गृहीत: । तथैव भोजव्याकरणे ऋ (१६५) गतौ चे'ति, सारस्वत व्याकरणेऽपि तथैवाऽर्थकबोधको ऋ (१९१) गतौ धातु: प्राप्यते । किन्तु पाणिनीय धातुपाठे ऋ (११७३) गतिप्रापणयो: इत्यर्थबोधको प्राप्यते । एवं भोजव्याकरणे गृ (२२७) निगरणे इत्यर्थकबोधको धातु: सारस्वतव्याकरणेऽपि गृ (२७२) निगरणे इति प्राप्यते किन्तु पाणिनीयव्याकरणे गृ (१५९८) शब्दे इत्यर्थबोधको धातु: वर्तते । तथा भोजव्याकरणे देङ् (८४) पालने इत्यर्थकबोधको धातु: सारस्वतव्याकरणेऽपि देङ् (१०१) पालने इत्यर्थबोधको धातुः वर्तते किन्तु पाणिनीयव्याकरणे देङ् (१०३१) रक्षणे इत्यर्थबोधको धातु: प्राप्यते।

भोजव्याकरणे इङ् (१३०) गतौ अर्थबोधको धातु: अस्ति किन्तु पाणिनीय-सारस्वतव्याकरणयो: इङ् (११२१) - (१७७) अध्ययने इत्यर्थबोधको धातु: वर्तते।

एवं भोजव्याकरणे यु (१२२) 'मिश्रणे' इति धातु: अस्ति, किन्तु पाणिनीयव्याकरणे यु (११०७) मिश्रणे आमिश्रणेचे'ति अर्थबोधको धातु: वर्तते।

भोजव्याकरणे अशूङ् (२०५) 'व्याप्तौ' इत्यर्थज्ञापक: धातु:, किन्तु पाणिनीये अशूङ् (१३४६) व्याप्तौ सङ्घाते च, एवं सारस्वतव्याकरणे अशूङ् (२३९) व्याप्तौ सङ्घातेचे'ति अर्थबोधको धातु: वर्तते।

भोजव्याकरणे द्युत (८६)द्योतने- इत्यर्थकबोधको धातु:, किन्तु पाणिनीय व्याकरणे द्युत (७८८) दीप्तौ, एवं सारस्वतव्याकरणे द्युत (१०५) दीप्तौ इति पाणिनीय सारस्वतव्याकरणयो: मध्ये समानार्थक बोधक: वर्तते।

भोजव्याकरणे इण् (१२८) 'गतौ', तथा च पाणिनीयव्याकरणेऽपि इण् (११२०) गतौ चे'ति प्राप्यते किन्तु सारस्वतव्याकरणे तस्य गणना नास्ति। तथैव भोजव्याकरणे ईश् (१४६) ऐश्वर्ये चे'ति धातुः एवं पाणिनीव्यिाकरणे ईश् (१०९०) ऐश्वर्ये चे'ति धातुः अस्ति। किन्तु सारस्वतव्याकरणे सः न स्वीकृतः।

भोजव्याकरणे पन (७५) व्यवहारेस्तुतौ च, तथा च पाणिनीय व्याकरणेऽपि पन (४७०) व्यवहारे स्तुतौ चे'ति धातुः अस्ति किन्तु सारस्वतव्याकरणे सः न गृहीतः।

भोजव्याकरणे भू (६५) प्राप्तौ, पाणिनीयव्याकरणे भू (११८७) प्राप्तौ इति च प्राप्येते, किन्तु सारस्वतव्याकरणे तस्योल्लेखः नास्ति।

तथैव भोजव्याकरणे अञ्चु (१६) गतिपूजनयोः, पाणिनीयव्याकरणे अञ्चु(१९७) गतिपूजनयोः एवं सारस्वतव्याकरणेऽपि अञ्चु (२१) गति पूजनयोः इति समानार्थवाचकः वर्तते। तथैव अश् (२४८) भोजने इति भोजव्याकरणे, अश् (१६२४) भोजने इति पाणिनीयव्याकरणे एवं सारस्वतव्याकरणेऽपि अश् (३१२) भोजने इति सामानार्थाः स्वीकृताः। तथा भोजव्याकरणे अय (७६) गतौ, पाणिनीयव्याकरणे अय (५०८) गतौ एवं सारस्वतव्याकरणे अय (९२) गतौ इत्यत्र समानार्थवाचकाः। एवं इदि (१४) परमैश्वये पाणिनीयव्याकरणे, इदि (६४) परमैश्वर्ये भोजव्याकरणे तथा च सारस्वतव्याकरणे इदि (१७) परमैश्वर्ये इति समानार्थकबोधकाः धातवः सन्ति। इक् (१२९) स्मरणे इति भोजव्याकरणे, इक् (११२२) स्मरणे- इति पाणिनीयव्याकरणे, एवं इक् (१५७) स्मरणे- इति च सारस्वतव्याकरणे समानर्थकाः सन्ति।

एवं पाणिनीयभोजसारस्वतव्याकरणेषु पठिताः समानार्थीयाः धातवः २०६, पाणिनीयसारस्वतधातुपाठयोः पठिताः समानार्थीयाः धातवः ०१५, पाणिनीयभोजव्यारणयोः पठिताः समानार्थीयाः धातवः ०१३ तथा च सारस्वतभोजव्याकरणयोः पठिताः समानार्थीयाः धातवः ०१६ सन्ति। एवं सर्वे सम्मील्य २५० संख्याकाः भवन्ति। तेषु ०३ धातवः परस्परभिन्नार्थीयानां धातूनां मेलनेन २५३ संख्याकाः धातवः भोजव्याकरणे संगृहीताः। इत्यलं बहुना।

## (ई) उणादिप्रकरणविचार: ॥

आर्यजयकल्याणकेन्द्रस्य (मुम्बई) ३० ग्रन्थाङ्के प्रथमे सारस्वतप्रक्रियासूत्रक्रमाख्ये परिशिष्टे ५८९ तमात्पृष्ठात् ६०१ तम पृष्ठपर्यन्तं ३०८ सूत्रेषु चतुर्दशसूत्राणि पुनरावर्तितानि, :अत: तेषामपहरणेन २९४ मितानि सूत्राणि वर्तन्ते। तेभ्य: सूत्रेभ्य: महोपाध्यायश्रीविनयसागरेण १७४ सूत्राणि परिगृहीतानि, तेभ्यश्च सूत्रत्रयं अस्मत् दृष्टिपथं नायातम्। अत: १७१ तमानि उणादि सूत्राणि पाणिने: अष्टाध्यायीत: अधोलिखित प्रकारेण महोपाध्याय-श्रीविनयसागर: सोदाहरणं भोजव्याकरणे विवेचयति।

**(अ)** सप्तपञ्चाशत् (५७) पाणिनीयसूत्राणां स्वीकार:। तद्यथा युवोरनाकौ (पा. ७, १. १.) (भो.व्या. ३, १. ४)। ह्रस्वस्य पिति कृति तुक् (पा. ६, १. ७१) (भो.व्या. ३, १. ५५)। प्याय:पी (पा. ६, १. १२८) (भो. व्या. ३, २. २४) इत्यादीनि यथातथमेव गृहीतानि। तथा च कानिचित्सूत्राणि ईषत्परिवर्तनेन प्रस्थापितानि। तद्यथा एजे: खश् (पा.३, २. ८) इत्यस्य एजां खश् (भो. व्या. ३, १.२९) इति रूपेण, शुष: क: (पा. ८, २. ५१) इत्यस्य शुषे : क: (भो. व्या. ३, २. ४१) हनश्चवध: (पा. ३, ३. ७६) इत्यस्य हनोवध: (भो. व्या. ३, ६. ११.) इत्येवं ईषत्परिवर्तनेन प्रस्थापितानि।

**(आ)** एकादश (११) सूत्राणि पदव्यत्ययेन परिगृहीतानि, तद्यथा-कर्तरि कृत् (पा. ३, ४. ६७) इत्यस्य, कृत् कर्तरि च (भो. व्या. ३, १. १), यजेश्चकरणे (पा. २, ३. ६३) इत्यस्य, करणे यजे: (भो.व्या. ३, १. ७३), आने मुक् (पा. ७, २. ६२) इत्यस्य मुगानेऽत: (भो. व्या. ३, ३. ९) इति सूत्रपदव्यत्यय: कृतो वर्तते।

**(इ)** षड्विंशति (२६) सूत्राणि संक्षिप्तीकृतानि सन्ति। तद्यथा कर्तरि कृत् (पा. ३, ४. ६७) इत्यस्य, कृत: (भो. व्या. ३, १. ३) पाघ्राध्माधेट् दृश: श: (पा. ३, १.१३७) इत्यस्य, दृशादे: श: (भो. व्या. ३, १.१७), ज्वलतिकसनेभ्यो ण: (पा. ३, १. १४०) इत्यस्य ज्वलादेर्ण: (भो. व्या. ३, १. १९) इति सूत्रसंक्षिप्तीकरणं कृतं वर्तते।

**(ई)** चतुर्दश (१४) वार्तिकानां स्वीकार: ईषत्परिवर्तनेन स्वीकृत:। तद्यथा- गिलेऽगिलस्य (वा. २७७) इत्यस्य, गीलेपरेऽगिलस्य (भो. व्या. ३, १.९) हन्तेर्घत्वं च (पा. वा. ६६७) इत्यस्य हन्तेर्धनश्च (भो. व्या. ३, १. १२), उरसो लोपश्च (पा. वा. ६१२) इत्यस्य उरस: सलोपो मुम् वा. (भो.व्या. ३, १. २३) इत्येवं पाणिनीय वार्तिकानां स्वीकार: कृतो वर्तते।

**(उ)** त्रयाणां (३) सूत्राणां सूत्रविभागद्वारा प्रस्थापनं कृतं वर्तते। तद्यथा - इगुपधज्ञाप्रीकिर: क: (पा. ३, १. १३५) इत्यस्य नाम्युपधात् क: (भो. व्या. ३, १. ६), जानातेश्च (भो. व्या. ३, १. ८) इति सूत्र विभाग: वर्तते। आतो मनिन्क्वनिब्वनिपश्च (पा.३, २. ९४) इत्यस्य, आतो मनिप् क्वनिप्वनिप: (भो. व्या. ३, १. ५१), स्थामी (भो. व्या. ३, १.५२) इति। तथा च ओरावश्यके (पा. ३, १.१२५) इत्यस्य ,

ओरावश्यके घ्यण् ( भो. व्या. ३, ७.११), ओदौतोर्यः स्वरवत् (भो. व्या. ३, ७.१२) इत्येवं सूत्रविभागकरणं वर्तते।

(ऊ) सप्तचत्वारिंशत् (४७) सूत्राणामैक्यमपि कृतं वर्तते। तद्यथा- कर्तरि शप् (पा. ३, १.६८), तिङ्शित्सार्वधातुकम् (पा. ३, ४.११३) चैतयोः स्थाने शिति चतुर्वत् (भो. व्या. ३, १.१८) इति। करणे यजः (पा. ३, २.८५), सुप्यजातौ णिनिताच्छिल्ये (पा. ३, २.८६) चैतयोः स्थाने. णिनिरतीते (भो. व्या. ३, २.७२) इति। एवञ्च, ल्वादिभ्यः (पा. ३, २.४४), ओदितश्च (पा. ८, २.४५) चैतयोः स्थाने ल्वाद्योदितः (भो. व्या. ३, २.२२) इत्येवमैक्यं कृतमस्ति।

(ऋ) अष्टात्रिंशत् (३८) सूत्राणां संज्ञापरिवर्तनं कृतं दृश्यते। तद्यथा- कर्मण्यन् (पा. ३, १.१०) इत्यत्र कार्येऽण् (भो. व्या. ३, १.२०) इति। सुपि स्थः (पा. ३, २.४) इत्यत्र नाम्नि च (भो. व्या. ३, १.२१) इति। वयसि च (पा. ३, २.१०) इत्यत्र अटौ (भो. व्या. ३, १.२६) इत्येवं संज्ञापरिवर्तनं दृश्यते।

(ॠ) त्रयाणां (३) सूत्राणां पाणिनीयव्याकरणे दृग्गोचरत्वं न जातम्, किन्तु भोजव्याकरणे वर्तन्ते। तद्यथा - दस्तस्य नो दश्च (भो. व्या. ३, २.१५), न द्विरुक्तानां जक्षादीनां नपुंसके शौ वा (भो. व्या. ३, ३.१३), अत्रभवत्तत्रभवतौ पूज्ये (भो. व्या. ३, १.१७) इति च।

एवं पाणिनीयसूत्राणां वार्तिकानां च यथातथस्वीकारः, ईषत्परिवर्तनं, सूत्रपदव्यत्ययः, इति अष्टाभिः प्रकारैः भोजव्याकरणे संगृहीतानि। अत्रेदं त्ववश्यं समाधेयं यत् भोजव्याकरणकारः महोपाध्यायश्री विनयसागरः सारस्वतव्याकरणस्य सूत्राण्यपि स्वीकरोति। अस्मिन् विषये एतेन प्रयासेन पाणिनीयभोजव्याकरणयोः उणादि सूत्राणां तूलनमेव प्रधानभूतम्।

MEHTA LIBRARY Baroda University

## (उ) सारस्वतप्रक्रियातः भोजव्याकरणे समुद्धृतानि पद्यानि ।

### (अकारादि क्रमेण)

१ अदिं हदिं स्कन्दिभिदिच्छिदि क्षुदीन्,
शदिं सदिं स्विद्यतिपद्यतिस्विदीन्,
तुदिं नुदिं विद्यति विन्त इत्यपि
प्रतीहि दान्तान् दश पञ्च चाऽनिटः ॥ २, १.१६०
(सारस्वतोपरि मुनिचन्द्रकीर्तिटीका सुबोधिका, पृ. २५७)

२. अनिट् स्वरान्तो भवतीति दृश्यताम् ।
इमांस्तु सेटः प्रवदन्ति तद्विदः ॥
अदन्तमृदन्तमृतां च वृङ्वृञौ ।
श्विडीडिवर्णेष्वथ शीङ्श्रियावपि ॥
२, १.१५१, सुबोधिका पृ. २५६ ।

३ अभिसर्वतसो कार्या धिगुपर्यादिषु त्रिषु ।
द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्राऽपि दृश्यते ॥
१, १६.२२, सुबोधिका पृ. १४६ ।

४ आवयोर्युवयोश्चेशो वेशो हेशस्तथैव च ।
अहेश आवयोरेवं हरिर्मामेव रक्षतु ॥
१, १३.२३, सुबोधिका पृ. १२६ ।

५. आशिताच्च भुवो भावे करणेऽथ तुराद्धुजात् ।
विहायसः - सुतोरोभ्यां हृदयाच्च जनात् प्लवात् ॥
३, ४७, सुबोधिका पृ. ४७२ ।

६ उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहार - संहार - विहार - परिहारवत् ॥
२, १७.१३, सुबोधिका पृ. ४४६ ।

७ कटं करोति कारूको रूपं पश्यति चाक्षुषः ।
राज्यं प्राप्नोति धर्मिष्ठः सोमं सुनोति सोमपाः
१, १६.२१, सुबोधिका पृ. १४५।

८ कटे शेते कुमारो ऽसौ वटे गावः सुशेरते।
तिलेषु विद्यते तैलं हृदि ब्रह्माऽमृतं परम् ॥
१, १६.३६, सुबोधिका पृ. १४९।

९ करीषकूलसर्वाभ्रात्कषः प्रियविशारदः।
ऋतिमेधभयात्कृञः क्षेममद्रप्रियात्तु वा॥
३-४२, सुबोधिका पृ. ४७१।

१० कर्ता कर्म च करणं सम्प्रदानं तथैव च ।
अपादानाधिकरणं इत्याहुः कारकाणि षट् ॥
१, १६.४, सुबोधिका पृ. १४४।

११ कुमाराः शेरते स्वैरं रोरूयन्ते च नारकाः।
जेगीयन्ते च गीतज्ञाः मेम्रियन्ते रुजा जिताः ॥
१, १६.९, सुबोधिका पृ. १४३।

१२ क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥
१, ५.१७, सुबोधिका पृ. ३९।

१३ क्षमस्व भो दुराराध्य भगोस्तुभ्यं नमोऽस्तु ते।
अधीष्व भो महाप्राज्ञ घातयाघो स्वघस्मरम् ॥
१, १६.१५, सुबोधिका पृ. १४४।

१४ गच्छतेः प्रत्ययः खः स्यात् पुनर्वाचंयमादयः।
आत्मन्कुक्ष्युदरेभ्यश्च भृञो धातोऽस्तु खिर्भवेत् ॥
३-४८, सुबोधिका पृ. ४७२।

१५ गणस्थमूदन्तमुतां च रुस्नुवौ क्षुवं तथार्णोतिमथो युणुक्ष्णुवः ।
इति स्वरान्ता निपूणैः समुच्चितास्ततो हसान्तानपि सन्निबोधत ॥
२, १.१५२, सुबोधिका पृ. २५६।

१६ ग्रहिज्यविय् व्यधिर्वष्टिर्विचतिर्वृश्चतिस्तथा ।
पृच्छतिर्भृज्जति श्चैव नवैते तु ग्रहादयः ॥
२, १.२९१, सुबोधिका पृ. २७९।

१७ चर्मणि द्वीपिनं हन्ति दन्तयोहन्ति कुञ्जरम् ।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥
१, १६.६५, सुबोधिका पृ. १५७।

१८ ज्यन्तैर्जेर्मन्यतेर्मुञ्ज कूलास्यपुष्पतो धयैः ।
नाडीमुष्टिशुनीपाणिकरस्तनात्सनासिकात् ॥
३-५८, सुबोधिका पृ. ४७३

१९. तपिं तिपिं चाऽपिमथो वपिं स्वपिं,
लिपिं लुपिं तृप्यतिदृप्यती सृपिम् ।
स्वरेण नीचेन शपिं छुपिं क्षिपिं,
प्रतीहि पान्तान् पठितांस्त्रयोदश ॥
२, १.१५९, सुबोधिका पृ. २५७।

२० दिशि दृशिं दंशिमथो मृशिं स्पृशिं ।
रिशिं रुशिं क्रोशतिमष्टमं विशिम् ॥
लिशिं च शान्ताननिटः पुराणगाः ।
पठन्ति पाठेषु दशैव नेतरान् ॥
२, १.१५६, सुबोधिका पृ. २५७।

२१ दिहिर्दुहिमेहतिरोहती वहि,
र्नहिस्तु षष्ठो दहतिस्तथा लिहिः ।
इमेऽनिटोऽष्टाविह मुक्तसंशया,
गणेषु हान्ता प्रविभज्य कीर्तिताः ॥

२, १.१५५, सुबोधिका पृ. २५७।

२२ दुह्याच्यर्थरुधिप्रच्छि चिब्रूशासुजिकर्मयुक् ।
नीहृकृष्मथ्वह् दण्डि - ग्रहमुष्पचिकर्मभाक् ॥

२, १७.४२, सुबोधिका पृ. ४५४।

२३ देवो वामवताद्विष्णुर्नरकान्तो जनार्दनः ।
स्वामी वो बलवान्राजा स्वामी नोऽसौ जनार्दनः ॥

१, १३.१७, सुबोधिका पृ. १२५।

२४ नमो वो ब्रह्मविज्ञेभ्यो ज्ञानं नो दीयतां धनम्।
सानन्दान्वः प्रपश्यामः पश्यामो नः सुदुःखिनः ॥

१, १३.१८, सुबोधिका पृ. १२५ ।

२५ निन्ये विजनमजागरि रजनीमगमि मदमयाचि सम्भोगम् ।
गोपी हास्यमकार्यत भावश्चैनामनन्तेन ॥

२, १७.४५, सुबोधिका पृ. ४५४।

२६ न्यादयोऽज्यन्तनिष्कर्मगत्यार्था मुख्यकर्मणि ।
प्रत्ययं याति दुह्यादिर्गौणेऽन्ये तु यथारुचि ॥

२, १७.४४, सुबोधिका पृ. ४५४ ।

२७ धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते । ।
तमेव विशिनष्ट्यन्यो-नर्थकोऽन्यः प्रयुज्यते ॥

१, १४.१९ सुबोधिका पृ. ४४६।

२८ ध्माखारीवातधटीत उद्रुज्वहौ तु कूलातः।
अरुर्विधुतिलात्तुदोऽप्यसूर्योग्राद् द्दशिस्तपिः ॥
३.५९, सुबोधिका पृ. ४७३।

२९ पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः।
विगृह्य चक्रे नमुचिद्विषा वशी य इत्थमस्वास्थमहर्निशं दिवः ॥
२, १८.३, सुबोधिका पृ. ४५६।

३० भिन्नः शरेण रामेण रावणो लोकरावणः ।
कराग्रेण विदीर्णोऽपि वानरैर्युध्यते पुनः ॥
१, १६.२९, सुबोधिका पृ. १४७।

३१ मनसि वचसि काये पुण्यपीयूषपूर्णाः,
त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः।
परगुणपरमाणून्पर्वतीकृत्य नित्यं,
निजहृदि विकसन्तः सन्ति सन्तः कीयन्तः ? ॥
१, १६.८, सुबोधिका पृ. १४२।

३२ मां समुद्धर गोविन्द ! प्रसीद परमेश्वर ! ।
कुमारौ ! स्वैरमासाथां क्षमध्वं भोस्तपस्विनः ! ॥
१, १६.१४, सुबोधिका पृ. १४४।

३३ यजिर्वपिर्वहिश्चैव वेञ्व्येञौ ह्वयतिःस्यपिः।
वद्वसि श्वयतिर्वक्ति-रेकादश यजादयः ।
२, १.२९२, सुबोधिका पृ. २७९।

३४ यत्र द्वित्वं बहुत्वं च स द्वंद्व इतरेतरः ।
वक्तव्यः स समाहारो यत्रैकत्वं नपुंसकम् ॥
१, १७.५४, सुबोधिका पृ. १७१।

३५ यदुक्तं लौकिकायेह तद्वेदे बहुलं भवेत्।
सेमां भूम्याददे सोषामित्यादीनामदुष्टता ॥
१, ५.१६, सुबोधिका पृ. ३८।

३६ यमिर्ज्ञमान्तेष्वनिडेक इष्यते, रमिर्दिवादावपि पठ्यते मनिः ।
नमिश्चतुर्थो हनिरेव पञ्चमो गमिस्तु षष्ठः प्रतिषेधवाचिनाम् ॥
२, १.१५४, सुबोधिका पृ. २५६।

३७ युध्धे संन्नह्यते वीरोंऽङ्गुल्यग्रे करिणां शतम् ।
भूभृत्सु पादपाः सन्ति गङ्गायां वरवालुकाः ॥
१, १६.३७, सुबोधिका पृ. १४९।

३८ रविरिव राजते राजा रोषात्कुमारी रोरूयते ।
बोभूज्यते भुवं भूपालः प्रागास्तां रामलक्ष्मणौ ॥
१, १६.७, सुबोधिका पृ. १४२।

३९ राज्ञः स पुरुषो ज्ञेयः पित्रोरेतत्प्रपूजनम् ।
गुरूणां वचनं पथ्यं कवीनां रसवद्वचः ॥
१, १६.३३, सुबोधिका पृ. १४९।

४० रामः सोमं पपिर्यज्ञे ददिर्गाश्चक्रिरद्भुतम्।
याजकान् वव्रिराजह्निः पौण्डरीकं महाद्विजान्।
३, १६३ सुबोधिका पृ. ५०२।

४१ रुधिः सराधिर्युधिबन्धिसाधयः
क्रुधिः क्षुधिः शुध्यतिबुध्यती व्यधिः।
इमे तु धान्ता दश चानिटो मता-
स्ततः परं सिध्यतिरेव नेतरे ॥
२, १.१५७, सुबोधिका पृ. २५७।

४२ रोदितिः स्वपितिश्चैव श्वसितिः प्राणितिस्तथा ।
जक्षितिश्चैव विज्ञेयो रुदादिः पञ्चको गणः ॥
२, २.६४, सुबोधिका पृ. ३१६ ।

४३ लज्जासत्तास्थितिजागरणं वृद्धिक्षयभयजीवितमरणम् ।
शयनक्रीडारुचिदीप्त्यर्थं धातुगणं तमकर्मकमाहु ः ॥
२, १७.३, सुबोधिका पृ. ४४५ ।

४४ ललाटतो वहाभ्राल्लिह् मितमाननखात् पचिः ।
वातादजिरिरापामद् जहातेः शर्द्धतस्तथा ॥
३, ६०. सुबोधिका पृ. ४७३ ।

४५ लुम्पेदवश्यमः कृत्ये तुङ्काममनसोरपि ।
समो वा हिततततयो-र्मांसस्य पचि युङ्घञोः ॥
३, २१८ सुबोधिका पृ. ५२१ ।

४६ वर्णविकारनाशाभ्यां धातोरतिशयेन यः
योगः स उच्यते प्राज्ञै-र्मयूरभ्रमरादिषु ॥
१, ५.२०, सुबोधिका पृ. ४० ।

४७ वर्णागमो गवेन्द्रादौ सिंहे वर्णविपर्ययः ।
षोडशादौ विकारः स्याद्वर्णनाशः पृषोदरे ॥
१, ५.१९, सुबोधिका पृ. ३७ ।

४८ वर्णागमो वर्णविपर्ययश्च-द्वौ चाऽपरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योग-स्तदुच्यते पञ्चविधं निरुक्तम् ।
१, ५.१८, सुबोधिका पृ. ३९ ।

४९ वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयो :।
आपं चैव हसान्तानां यथा वाचा निशा दिशा।
१, १५.७, सुबोधिका पृ. १३३।

५० वहः कृती क्तौ कृतसम्प्रसारे होढस्तथोर्धो ष्टुभिना ढि ढश्च।
ऊढिश्च ञिर्डित्करणे स धातुर्ञेरञ् स्वरादेर्ढ ज औजढश्च।
२, १५.१७, सुबोधिका पृ. ४३८।

५१ शकिस्तु कान्तेष्वनिडेक इष्यते, घसिश्च सान्तेषु वसिः प्रसारणी।
रभिश्च भान्तेष्वथ मैथुने यभि,स्ततस्तृतीयो लभिरेव नेतरे॥
२, १.१५३, सुबोधिका पृ. २५६।

५२ शकृत्स्तम्बात्कृञः फल-रजोमलाद्ग्रहो हृञः।
दृतिनाथाद्देववातादापः कर्तरि वाच्य इः॥
३, ३७. सुबोधिका पृ. ४७६।

५३ शिपिं पिषिं शुष्यतिपुष्यती त्विषिं
श्लिषिं विषिं तुष्यतिदुष्यती द्विषिम्।
इमान्दशैवोपदिशन्त्यनिड्विधौ।
गणेषु षान्तान्कृषिकर्षती तथा॥
२, १.१५८ , सुबोधिका पृ. २५७।

५४ सम्बोधने तूशनसस्त्रिरूपं सान्तं तथा नान्तमथाऽप्यदन्तम्।
माध्यन्दिनिर्वष्टि गुणं त्विगन्ते नपुंसके व्याघ्रपदां वरिष्ठः॥
१, ९.११, सुबोधिका पृ. ८०।

५५ संयमाय श्रुतं धत्ते नरो धमार्य संयमम्।
धर्मं मोक्षाय मेधावी धनं दानाय भुक्तये॥
१, १६.५९ , सुबोधिका पृ. १५६।

५६ सामान्यशास्त्रतो नूनं विशेषो बलवान्भवेत्।
परेण पूर्वबाधो वा प्रायशो दृश्यतामिह ॥

१, २.२२ , सुबोधिका पृ. २०।

५७ सैष दाशरथी रामः सैष राजा युधिष्ठिरः।
सैष कर्णो महात्यागी सैष भीमो महाबलः

१, ५.१५ , सुबोधिका पृ. ३८।

५८ स्वामी ते स समायातः स्वामी मे साम्प्रतं गतः।
नमस्ते भगवन्! भूयो देहि मे मोक्षमक्षयम् ॥

१, १३.१५ , सुबोधिका पृ. १२५।

५९ स्वामी वां स जहासोच्चै-र्दृष्ट्वा नौ दानयाचनाम्।
राजा वां दास्यते दानं ज्ञानं नौ मधुसूदनः ॥

१, १३.१६ , सुबोधिका पृ. १२५।

# टिप्पणी

१. भाण्डारकर प्राच्यविद्यामन्दिरम्, पुण्यपत्तनम्,

हस्तप्रतक्रमांक - २३९, १८९२-९५, पत्राणि-९, लिपिर्देवनागरी। प्रत्येकस्मिन् पृष्ठे पङ्क्तयः सप्त, प्रतिपङ्क्तौ प्रायः ४४ अक्षराणि। (अस्य बोधकरणस्य कृते मम मार्गदर्शकाः डॉ. जयदेव जानी महाभागाः साभारं स्मर्यन्ते। उपरि निर्दिष्टं हस्तप्रतं पुरतो निधाय - सारस्वतं व्याकरण् (व्यक्तित्वं कर्तृत्वं च) इत्याख्ये द्वितीयाध्याये सारस्वतव्याकरण परम्परा इत्याख्ये विभागे परिचयः प्रदत्तोऽस्ति।)

२. अनुभूतिस्वरूपाचार्यकृतं सारस्वतं व्याकरणम्। विठ्ठलनारायण गोरे महोदयेन संशोधितम्, निर्णयसागरमुद्रणयन्त्रालये मुम्बापुर्यां प्रकाशितम्, वि. सं. १९४२।

३. श्री रामाश्रम प्रणीता वैयाकरणसिद्धान्तचन्द्रिका।

(पं. श्री जोशी सदाशिवशास्त्रि विरचितया संक्षिप्त बालबोधिनी टीकया सहिता)।

हरिदास-संस्कृत-सीरीझ-१७, प्रका.-जयकृष्णदास हरिदास गुप्तः, चौखम्बा संस्कृत सीरीझ ऑफिस, विद्याविलास प्रेस, बनारस माला, भावनगर।

४. श्री जिनचन्द्रसूरिरचिता सिद्धान्तरत्निका । (सारस्वतवृत्तिः)।

श्रीयशोविजय श्रीजैनग्रन्थमाला, भावनगर ।

५. वन्दे ब्रह्म शिवं वन्दे वन्दे देवीं सरस्वतीम्।
लक्ष्मीं वन्दे हरिं वन्दे वन्दे सिद्धार्थदेवताः ॥

६. संज्ञा सन्धिर्विभक्तिश्च युष्मदस्मच्च कारकम्।
तद्धितः स्त्रीसमासश्च दशधाख्यातमिष्यते ॥१॥
कृतश्च प्रत्यया धातोर्विभक्त्यन्तं पदं स्मृतम्।
वाक्यं तत्समुदायश्च सा वाक्यामधुगुच्यते ॥ २ ॥

७. शाह पं. शिवलाल नेमचन्द ;

सिद्धहेमसारांशः संस्कृतव्याकरणम् (विषयवार प्रकरणक्रमः),

श्री हेमचन्द्राचार्य जैनमन्दिरम्, पाटण, ख्रि. १९८७।